षपि आत्मं०क्लीबते सुग्ध०। ४शब्दनिष्ठधर्म्मभेदे तद्विवृतिः शब्दार्थरत्ने यथा

"लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म्म एव तद्विशेषश्च पुंनपुंसकत्वादिः। तथा हि सर्व्वेषां त्रिगुणप्रकृतिकार्य्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे इत्थमभ्यधायि। त्रिकृतसत्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्वस्याधिक्ये पुंस्त्वम्, रजआधिक्ये स्त्रीत्वमिति। एवञ्च लिङ्गस्य शब्दधर्म्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्व्वत्र तस्य विशेषणत्वम् शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति प्रागुक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नो चेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थेऽवभासते" इति हर्य्युक्तेश्च शब्दानां नामार्थतावगतेः। तथा प्रातिपदिकार्थः। अभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत् पुंलिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति" पा०सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्म्मत्वमन्यथैतेषु लिङ्गाद्यनन्वयापत्तेर्व्यवहारसूत्रनिर्द्देशासङ्गत्यापत्तेश्च। तथा ऽर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्म्मविशेषरूपभेदकसद्भावात्। उक्तञ्च भाष्ये "एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति"। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्व्वीकत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्"। "अकारादि क्षकारान्तान् क्लीबहीनान् लिखेत्ततः। ऋकारर्स्वद्वयं ऌद्वयं क्लीबं प्रचक्षते" अकडमचक्रे तन्त्रसारोक्ते ऋकारादिवर्णचतुष्के च

**क्लु** गतौ आ० भ्वा० सक० अनिट्। क्लवते अक्लोष्ट चुक्लुवे

**क्लृप्त** त्रि० क्लृप—क्त। १रचिते २कल्पिते ३विहिते ४निर्म्मिते च शब्दच० "पतिंवरा क्लृप्तविवाहवेषा" क्लृप्तेन सोपानपथेन मञ्चम्" रघुः। ५वापिते च "क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः" मनुः।

**क्लृप्तकीला** स्त्री क्लृप्तं कीलमत्र। (पाट्टा) इतिख्याते। निर्द्दिष्टकरग्रहणार्थं दत्तभूमिशस्यग्रहणोपयोगिस्वत्वज्ञापके पत्रभेदे हि०।

**क्लेद** पु० क्लिद—भावे घञ्। १आर्द्रतायाम्। सा च जलविकारभेदः यथाह या० "रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्द्दवम्"। "रसादुदकात् रसनेन्द्रियं शैत्यमङ्गानां, स्नेहं स्निग्धताम् मृदुतासहितं क्लेदमार्द्रताम्" मिता०। देहस्थः क्लेदश्च श्लेष्मकार्य्यः क्लेदनशब्दे विवृतः। "तदञ्जनक्लेदसमाकुलाक्षम्" "स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया" रघुः। २पूतीभावे शब्दचि० "पदस्थितस्य पद्मस्य बन्धू वरुणभास्करौ। पदाच्च्युतस्य तस्यैव क्लेदक्लेशकरावुभौ"

**क्लेदक** त्रि० क्लेदयति क्लिद णिच्-ण्वुल्। १क्लेदकारके देहस्थकफे क्लेदनशब्दे विवृतिः। २क्लेदकारके जलादौ त्रि०। देहस्थदशवह्निमध्ये ३वह्निभेदे अग्निशब्दे ५० पृ० पदार्थादर्शवाक्यम् दृश्यम्। जलस्य क्लेदकत्वेऽपि तत्र अग्नेः साहचर्य्यादेव तथात्वम्।

**क्लेदन्** पु० क्लेदयति क्लिद-णिच्—कनिन् (चन्द्रे उणा०)

**क्लेदन** पु० क्लेदयति क्लिद—णिच् ल्यु। क्लेदकारके देहस्थे श्लेष्मभेदे तद्विवृतिः भावप्रकाशे

"कफस्यैतानि नामानि क्लेदनश्चावलम्बनः। रसनः स्नेहनश्चापि श्लेष्मणः स्थानभेदतः। अथ क्लेदनादीनां स्थानान्याह "आमाशयेऽथ हृदये कण्ठे शिरसि सन्धिषु। स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात्"। दोषाणां सकलशरीरव्यापिनामपि पञ्च पञ्च स्थानानीति बाहुल्याभिप्रायेणोक्तानि। तथाच वाग्भटः "इति प्रायेण दोषाणां स्थानान्यवीकृतात्मनाम्। व्यापिनामपि जानीयात् कर्म्माणि च पृथक् पृथक्"। चरकश्च "ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः" इति। अथ तत्तत्स्थानगतस्य श्लेष्मणः कर्म्माण्याह "क्लेदनः क्लेदयत्यन्नमामाशयगतान्यपराण्यपि। अनुगृह्णाति च श्लेष्मस्थानान्युदककर्म्मणा"। अयमर्थः क्लेदनोऽन्नं क्लेदयति तेन संहतमन्नं भेदं प्राप्नोति। अपराण्यपि श्लेष्मस्थानानि हृदयादीनि मार्गेण गत्वा तत्र तत्र हृदयालम्बनसन्धारणरसग्रहणसमस्तेन्द्रियतर्पणसन्धिसंश्लेषणादुदककर्म्मभिरनुगृह्णाति उपकरोति। तथा च "रसयुक्तात्मवीर्य्येण हृदयस्यावलम्बनम्। त्रिकसन्धारणं चापि विदधात्यवलम्बनः"। त्रिकं शिरोबाहुद्वयसन्धिः। "उभावपि ततः सौम्यौ तिष्ठतस्त्वान्तिके यतः। ततो रसान्विजानीयात् रसनारसनौ समौ"। रसना रसनेन्द्रियं रसनः कण्ठस्थकफः। "स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः।